श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્દભાગવત રસિક કુટુંબ

## UG-11.27 - ષષ્ઠ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्‌भुत अनमोल उद्‌गार।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(વ્ઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

શ્રીમદ્દભાગવતમહાપુરાણમ્
એકાદશઃ સ્કન્ધઃ
.. અથ સપ્તવિં(મ્)શોઽધ્યાયઃ ..

ઉદ્ધવ ઉવાચ
ક્રિયાયોગં(મ્) સમાચક્ષ્વ, ભવદારાધનં(મ્) પ્રભો .
યસ્માત્ત્વાં(યઁ) યે યથાર્ચન્તિ, સાત્વતાઃ(સ્) સાત્વતર્ષભ .. ૧..

એતદ્ વદન્તિ મુનયો, મુહુર્નિઃશ્રેયસં(ન્) નૃણામ્ .
નારદો ભગવાન્ વ્યાસ, આચાર્યોઽઙ્ગિરસઃ(સ્) સુતઃ .. ૨..

નિઃ(સ્)સૃતં(ન્) તે મુખામ્ભોજાદ્, યદાહ ભગવાનજઃ .
પુત્રેભ્યો ભૃગુમુખ્યેભ્યો, દેવ્યૈ ચ ભગવાન્ ભવઃ .. ૩..

એતદ્ વૈ સર્વવર્ણાના-માશ્રમાણાં(ઙ્) ચ સમ્મતમ્ .
શ્રેયસામુત્તમં(મ્) મન્યે, સ્ત્રીશૂદ્રાણાં(ઙ્) ચ માનદ .. ૪..

એતત્ કમલપત્રાક્ષ- કર્મબન્ધવિમોચનમ્ .
ભક્તાય ચાનુરક્તાય, બ્રૂહિ વિશ્વેશ્વરેશ્વર .. ૫..

શ્રીભગવાનુવાચ

ન હ્યન્તોઽનન્તપારસ્ય, કર્મકાણ્ડસ્ય ચોદ્ધવ .
સં(ઙ્)ક્ષિપ્તં(વ્ઁ) વર્ણયિષ્યામિ, યથાવદનુપૂર્વશઃ .. ૬..

વૈદિકસ્તાન્ત્રિકો મિશ્ર, ઇતિ મે ત્રિવિધો મખઃ .
ત્રયાણામીપ્સિતેનૈવ, વિધિના માં(મ્) સમર્ચયેત્ .. ૭..

યદા સ્વનિગમેનોક્તં(ન્), દ્વિજત્વં(મ્) પ્રાપ્ય પૂરુષઃ .
યથા યજેત માં(મ્) ભક્ત્યા, શ્રદ્ધયા તન્નિબોધ મે .. ૮..

અર્ચાયાં(મ્) સ્થણ્ડિલેઽગ્નૌ વા, સૂર્યે વાપ્સુ હૃદિ દ્વિજે .
દ્રવ્યેણ ભક્તિયુક્તોઽર્ચેત્ - સ્વગુરું(મ્) મામમાયયા .. ૯..

પૂર્વં(મ્) સ્નાનં(મ્) પ્રકુર્વીત, ધૌતદન્તોઽઙ્ગશુદ્ધયે .
ઉભયૈરપિ ચ સ્નાનં(મ્), મન્ત્રૈર્મૃદ્ગ્રહણાદિના .. ૧૦..

સન્ધ્યોપાસ્ત્યાદિકર્માણિ, વેદેનાચોદિતાનિ મે .
પૂજાં(ન્) તૈઃ(ખ્) કલ્પયેત્ સમ્યક્, સં(ઙ્)કલ્પઃ(ખ્) કર્મપાવનીમ્ .. ૧૧..

શૈલી દારુમયી લૌહી, લેપ્યા લેખ્યા ચ સૈકતી .

મનોમયી મણિમયી, પ્રતિમાષ્ટવિધા સ્મૃતા .. ૧૨..

ચલાચલેતિ દ્વિવિધા, પ્રતિષ્ઠા જીવમન્દિરમ્ .

ઉદ્વાસાવાહને ન સ્તઃ(સ્), સ્થિરાયામુદ્ધવાર્ચને .. ૧૩..

અસ્થિરાયાં(વ્ઁ) વિકલ્પઃ(સ્) સ્યાત્ - સ્થણ્ડિલે તુ ભવેદ્ દ્વયમ્ .

સ્નપનં(ન્) ત્વવિલેપ્યાયા - મન્યત્ર પરિમાર્જનમ્ .. ૧૪..

દ્રવ્યૈઃ(ફ્) પ્રસિદ્ધૈર્મદ્યાગઃ(ફ્), પ્રતિમાદિષ્વમાયિનઃ .

ભક્તસ્ય ચ યથાલબ્ધૈર્ - હૃદિ ભાવેન ચૈવ હિ .. ૧૫..

સ્નાનાલં(ઙ્)કરણં(મ્) પ્રેષ્ઠ-મર્ચાયામેવ તૂદ્ધવ .

સ્થણ્ડિલે તત્ત્વવિન્યાસો, વહ્નાવાજ્યપ્લુતં(મ્) હવિઃ .. ૧૬..

સૂર્યે ચાભ્યર્હણં(મ્) પ્રેષ્ઠં(મ્), સલિલે સલિલાદિભિઃ .

શ્રદ્ધયોપાહૃતં(મ્) પ્રેષ્ઠં(મ્), ભક્તેન મમ વાર્યપિ .. ૧૭..

ભૂર્યપ્યભક્તોપહૃતં(ન્), ન મે તોષાય કલ્પતે .

ગન્ધો ધૂપઃ(સ્) સુમનસો, દીપોડન્નાદ્યં(ઞ્) ચ કિં(મ્) પુનઃ .. ૧૮..

શુચિઃ(સ્) સમ્ભૃતસમ્ભારઃ(ફ્), પ્રાગ્દર્ભૈઃ(ખ્) કલ્પિતાસનઃ .

આસીનઃ(ફ્) પ્રાગુદગ્ વાર્ચે - દર્ચાયામથ સમ્મુખઃ .. ૧૯..

કૃતન્યાસઃ(ખ્) કૃતન્યાસાં(મ્), મદર્ચાં(મ્) પાણિના મૃજેત્ .

કલશં(મ્) પ્રોક્ષણીયં(ઞ્) ચ, યથાવદુપસાધયેત્ .. ૨૦..

તદંદ્ભિર્દેવયજનં(ન્), દ્રવ્યાણ્યાત્માનમેવ ચ .
પ્રોક્ષ્ય પાત્રાણિ ત્રીણ્યંદ્ભિસ્ - તૈસ્તૈર્દ્રવ્યૈશ્ચ સાધયેત્ .. ૨૧..

પાદ્યાર્ઘ્યાચમનીયાર્થં(ન્), ત્રીણિ પાત્રાણિ દૈશિકઃ .
હૃદા શીર્ષ્ણાથ શિખયા, ગાયત્ર્યા ચાભિમન્ત્રયેત્ .. ૨૨..

પિણ્ડે વાય્વંગ્નિસં(મ્)શુદ્ધે, હૃત્પદ્મસ્થાં(મ્) પરાં(મ્) મમ .
અંણ્વીં(ઞ્) જીવકલાં(ન્) ધ્યાયેન્ - નાદાન્તે સિદ્ધભાવિતામ્ .. ૨૩..

તયાઽઽત્મભૂતયા પિણ્ડે, વ્યાપ્તે સમ્પૂજ્ય તન્મયઃ .
આવાહ્યાર્ચાદિષુ સ્થાપ્ય, ન્યસ્તાં(ઙ્)ગં(મ્)માં(મ્) પ્રપૂજયેત્ .. ૨૪..

પાદ્યોપસ્પર્શાર્હણાદી - નુપચારાન્ પ્રકલ્પયેત્ .
ધર્માદિભિશ્ચ નવભિઃ(ખ્), કલ્પયિત્વાઽઽસનં(મ્) મમ .. ૨૫..

પદ્મમષ્ટદલં(ન્) તત્ર, કર્ણિકાકેસરોજ્જ્વલમ્ .
ઉભાભ્યાં(વ્ઁ) વેદતન્ત્રાભ્યાં(મ્), મહ્યં(ન્) તૂભયસિદ્ધયે .. ૨૬..

સુદર્શનં(મ્) પાઞ્ચજન્યં(ઙ્), ગદાસીષુધનુર્હલાન્ .
મુસલં(ઙ્) કૌસ્તુભં(મ્) માલાં(મ્), શ્રીવત્સં(ઞ્) ચાનુપૂજયેત્ .. ૨૭..

નન્દં(મ્) સુનન્દં(ઙ્) ગરુડં(મ્), પ્રચણ્ડં(ઞ્) ચણ્ડમેવ ચ .
મહાબલં(મ્) બલં(ઞ્) ચૈવ, કુમુદં(ઙ્) કમુદેક્ષણમ્ .. ૨૮..

દુર્ગાં(વ્ઁ) વિનાયકં(વ્ઁ) વ્યાસં(વ્ઁ), વિષ્વક્સેનં(ઙ્) ગુરૂન્ સુરાન્ .
સ્વે સ્વે સ્થાને ત્વભિમુખાન્, પૂજયેત્ પ્રોક્ષણાદિભિઃ .. ૨૯..

ચન્દનોશીરકર્પૂર - કું(ઙ્)કુમાગુરુવાસિતૈઃ .
સલિલૈઃ(સ્) સ્નાપયેન્મન્ત્રૈર્- નિત્યદા વિભવે સતિ .. ૩૦..

સ્વર્ણઘર્માનુવાકેન, મહાપુરુષવિદ્યયા .
પૌરુષેણાપિ સૂક્તેન, સામભી રાજનાદિભિઃ .. ૩૧..

વસ્ત્રોપવીતાભરણ - પત્રસ્રગ્ગન્ધલેપનૈઃ .
અલં(ઙ્)કુર્વીત સપ્રેમ, મદ્ભક્તો માં(યઁ) યથોચિતમ્ .. ૩૨..

પાદ્યમાચમનીયં(ઞ્) ચ, ગન્ધં(મ્) સુમનસોઽક્ષતાન્ .
ધૂપદીપોપહાર્યાણિ, દદ્યાન્મે શ્રદ્ધયાર્ચકઃ .. ૩૩..

ગુડપાયસસર્પી(મ્)ષિ, શષ્કુલ્યાપૂપમોદકાન્ .
સં(યઁ)યાવદધિસૂપાં(મ્)શ્ચ, નૈવેદ્યં(મ્) સતિ કલ્પયેત્ .. ૩૪..

અભ્યં(ઙ્)ગોન્મર્દનાદર્શ-દન્તધાવાભિષેચનમ્ .
અન્નાદ્યગીતનૃત્યાદિ, પર્વણિ સ્યુરુતાન્વહમ્ .. ૩૫..

વિધિના વિહિતે કુણ્ડે, મેખલાગર્તવેદિભિઃ .
અગ્નિમાધાય પરિતઃ(સ્), સમૂહેત્ પાણિનોદિતમ્ .. ૩૬..

પરિસ્તીર્યાથ પર્યુક્ષે- દન્વાધાય યથાવિધિ .
પ્રોક્ષણ્યાઽઽસાદ્ય દ્રવ્યાણિ, પ્રોક્ષ્યાગ્નૌ ભાવયેત મામ્ .. ૩૭..

તપ્તજામ્બૂનદપ્રખ્યં(મ્), શં(ઙ્)ખચક્રગદામ્બુજૈઃ .
લસચ્ચતુર્ભુજં(મ્) શાન્તં(મ્), પદ્મકિં(ઞ્)જલ્કવાસસમ્ .. ૩૮..

સ્ફુરત્કિરીટકટક - કટિસૂત્રવરાં(ઙ્) ગદમ્.
શ્રીવત્સવક્ષસં(મ્) ભ્રાજત્- કૌસ્તુભં(વ્ઁ) વનમાલિનમ્ .. ૩૯..

ધ્યાયન્નભ્યર્ચ્ય દારૂણિ, હવિષાભિઘૃતાનિ ચ .
પ્રાસ્યાજ્યભાગાવાઘારૌ, દત્ત્વા ચાજ્યપ્લુતં(મ્) હવિઃ .. ૪૦..

જુહુયાન્મૂલમન્ત્રેણ, ષોડશર્ચાવદાનતઃ .
ધર્માદિભ્યો યથાન્યાયં(મ્), મન્ત્રૈઃ(સ્) સ્વિષ્ટિકૃતં(મ્) બુધઃ .. ૪૧..

અભ્યર્ચ્યાથ નમસ્કૃત્ય, પાર્ષદેભ્યો બલિં(મ્) હરેત્ .
મૂલમન્ત્રં(ઞ્) જપેદ્ બ્રહ્મ, સ્મરન્નારાયણાત્મકમ્ .. ૪૨..

દત્ત્વાઽઽચમનમુચ્છેષં(વ્ઁ), વિષ્વક્સેનાય કલ્પયેત્ .
મુખવાસં(મ્) સુરભિમત્-  તામ્બૂલાદ્યમથાર્હયેત્ .. ૪૩..

ઉપગાયન્ ગૃણન્ નૃત્યન્, કર્માણ્યભિનયન્ મમ .
મત્કથાઃ(શ્) શ્રાવયચ્છૃણ્વન્, મુહૂર્તં(ઙ્) ક્ષણિકો ભવેત્ .. ૪૪..

સ્તવૈરુચ્ચાવચૈઃ(સ્) સ્તોત્રૈઃ(ફ્), પૌરાણૈઃ(ફ્) પ્રાકૃતૈરપિ .
સ્તુત્વા પ્રસીદ ભગવન્ - નિતિ વન્દેત દણ્ડવત્ .. ૪૫..

શિરો મત્પાદયોઃ(ખ્) કૃત્વા, બાહુભ્યાં(ઞ્) ચ પરસ્પરમ્ .
પ્રપન્નં(મ્) પાહિ મામીશ, ભીતં(મ્) મૃત્યુગ્રહાર્ણવાત્ .. ૪૬..

ઇતિ શેષાં(મ્) મયા દત્તાં(મ્), શિરસ્યાધાય સાદરમ્ .
ઉદ્વાસયેચ્ચેદુદ્વાસ્યં(ઞ્) જ્યોતિર્જ્યોતિષિ તત્ પુનઃ .. ૪૭..

અર્ચાદિષુ યદા યત્ર, શ્રદ્ધા માં(ન્) તત્ર ચાર્ચયેત્ .
સર્વભૂતેષ્વાત્મનિ ચ, સર્વાત્માહમવસ્થિતઃ .. ૪૮..

એવં(ઙ્) ક્રિયાયોગપથૈઃ(ફ્), પુમાન્ વૈદિકતાન્ત્રિકૈઃ .
અર્ચન્નુભયતઃ(સ્) સિદ્ધિં(મ્), મત્તો વિન્દત્યભીપ્સિતામ્ .. ૪૯..

મદર્ચાં(મ્) સમ્પ્રતિષ્ઠાપ્ય, મન્દિરં(ઙ્) કારયેદ્ દૃઢમ્ .
પુષ્પોદ્યાનાનિ રમ્યાણિ, પૂજાયાત્રોત્સવાશ્રિતાન્ .. ૫૦..

પૂજાદીનાં(મ્) પ્રવાહાર્થં(મ્), મહાપર્વસ્વથાન્વહમ્ .
ક્ષેત્રાપણપુરગ્રામાન્, દત્ત્વા મત્સાર્ષ્ટિતામિયાત્ .. ૫૧..

પ્રતિષ્ઠયા સાર્વભૌમં(મ્), સદ્મના ભુવનત્રયમ્ .
પૂજાદિના બ્રહ્મલોકં(ન્), ત્રિભિર્મત્સામ્યતામિયાત્ .. ૫૨..

મામેવ નૈરપેક્ષ્યેણ, ભક્તિયોગેન વિન્દતિ .
ભક્તિયોગં(મ્) સ લભતે, એવં(યઁ) યઃ(ફ્) પૂજયેત મામ્ .. ૫૩..

યઃ(સ્) સ્વદત્તાં(મ્) પરૈર્દત્તાં(મ્), હરેત સુરવિપ્રયોઃ .
વૃત્તિં(મ્) સ જાયતે વિડ્ભુગ્, વર્ષાણામયુતાયુતમ્ .. ૫૪..

કર્તુશ્ચ સારથેર્હેતો- રનુમોદિતુરેવ ચ .
કર્મણાં(મ્) ભાગિનઃ(ફ્) પ્રેત્ય, ભૂયો ભૂયસિ તત્ફલમ્ .. ૫૫..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)

સં(મ્)હિતાયામેકાદશસ્કન્ધે સપ્તવિં(મ્)શોઽધ્યાયઃ .. ૨૭..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.

ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

